ओं (3)

## गुरुध्यानं

गुरुर्ब्रह्मा गुरुर्विष्णु
गुरुर्देवो महेश्वरः
गुरुसाक्षात् परंब्रह्मः
तस्मैश्री गुरवे नमः

अज्ञानतिमिरान्धस्य
ज्ञानञ्जनशलाकया
चक्षुरुन्मीलितं येन
तस्मैश्री गुरवे नमः

अखण्डमण्डलाकारं
व्याप्तं येन चराचरं
तत्पदं दर्शितंयेन
तस्मै श्रीगुरवे नमः

अरुणारुणकल्लोल
करूणाकलितात्मने
नरानुग्रहरूपाय
गुरवे कुसुमाञ्जलि

कामक्रुधाद्यखिलदोषमपास्य राम–
नामाक्षरामृतकणैर् हृदयंनिषिञ्चन
यः साध्वनुग्रहपथेन दिवंविवेश
तं नीलकण्ठगुरुदेवमनुस्मरामिः

विग्रहे रामचन्द्रस्य विलयीभूत चेतसा
अहं ब्रह्मेतिवेदान्त तत्त्वबोध स्वरूपिणे
विभूतिमात्रदानेन सर्व्वानुग्रहदायिने
श्री नीलकण्ठशिष्याय सत्यानन्दाय ते नमः

## शक्तिगणपतिध्यानं

मातंगाननमाखुवाहनमजं शक्त्युत्थतेजोमयं

ध्यायेत्तं दधतं वराभयकरं शंखं च पाशं ततः
शक्तिं पङ्कजमिक्षुमेव कणिशं हैमं च दिव्यंघटं
पक्वं दाडिममुद्भटोच्चलगदां शूलं रथाङ्गं करैः

## मूलमन्त्रं

ओं गं गणपतये नमः (3)

## सरस्वती ध्यानं

या कुन्देन्दुतुषारहारधवळा
या शुभ्रवस्त्रावृता
या वीणावरदण्डमण्डितकरा
या श्वेतपद्मासना
या ब्रह्माच्युतशङ्करप्रभृतिभिर्
देवैः सदापूजिता
सा मां पातु सरस्वती भगवती
निश्शेषजाड्यापहा

## मूलमन्त्रं

ओं सं सरस्वत्यै नमः (3)

## श्रीरामध्यानं

वैदेहीमभिवीक्ष्य जातपुळकां वामांगमासेविनीं
वामेनस्तनचूचुकं पुळकिना वामं करेणामृशन्
तत्त्वं दक्षिणपाणिनाकलितया तन्मुद्रयादर्शयन्
रामो मारुतिसेवितो लसतु मे साम्राज्य सिंहासने

## मूलमन्त्रं

ओं रं रामाय नमः (3)

ओं नमोभगवते रघुनन्दनाय
रक्षौघविनाशनाय रिपुचोरव्याघ्र–
कृमिकीटपतंगादि दुष्टसत्वविनाशनाय
मधुरप्रसन्नवदनाय अमिततेजसे
वीराय रामाय विष्णवे नमः

## हनुमद्ध्यानं

यत्रयत्र रघुनाथकीर्त्तनं
तत्रतत्र कृतमस्तकाञ्जलिं
बाष्पवारि परिपूर्ण्णलोचनं
मारुतीं नमत राक्षसान्तकं

मनोजवं मारुततुल्यवेगं
जितेन्द्रियं बुद्धिमतां वरिष्ठं
वातात्मजं वानरयूथमुख्यं
श्रीरामदूतं शरणं प्रपद्ये

गोष्पदीकृतवाराशीं
मशकीकृतराक्षसं
रामायणमहामाला–
रत्नं वन्देऽनिलात्मजं

## मूलमन्त्रं

ओं हं हनुमन्ताय आञ्जनेयाय महाबलाय नमः (3)

## मृत्युञ्जयमन्त्रं (3)

ओं त्र्यंबकं यजामहे
सुगन्धिं पुष्टिवर्द्धनं
उर्वारुकमिव बन्धनात्
मृत्योर् मुक्षीय माऽमृतात्

## सुदर्शनमन्त्रं

कल्पान्तार्क्कप्रकाशं त्रिभुवनमखिलं तेजसा
पूरयन्तं, रक्ताक्षं पिङ्ककेशं रिपुकुल भयदं
भीमदंष्ट्राहासं! शंखं चक्रं गदाब्जे
पृथुतर मुसलं चाप पाशाङ्कुशान स्वैर्बिभ्राणं
दोर्भिराद्ध्यं मनसिमुररिपुं भावये चक्रसब्जं

## मूलमन्त्रं

ओं नमो भगवते महासुदर्शनाय हुं भ् स्वाह !! (3)

ओं क्लीं कृष्णाय गोविन्दाय गोपीजन वल्लभाय
पराय परं पुरुषाय परमात्मने परकर्म्म मन्त्र
यन्त्रौषध अस्त्र शस्त्राणि संहरसंहर मृत्योर्
मोचय मोचय ओं नमो भगवते महासुदर्शनाय
दीप्ते ज्वाला परीताय सर्व्विदक्षोभणकराय ब्रह्मणे
परंज्योतिषे हूं भट् स्वाहा !!